# संस्कृत-वार्ताः

**दिनाङ्क : 11.11.2025**

**सायम् - 06:20**

## आदौ मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् नवदिल्ल्यां सञ्जातायाः भयावह-घटनायाः षड्यन्त्र-कर्तारः नैव क्षमिष्यन्ते।
- केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य नवदिल्ल्यां स्वकीयावासे उच्चस्तरीय-सुरक्षासमीक्षोपवेशनस्य आध्यक्षम् अकरोत्।
- बिहारराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिम-चरणाय सप्तषष्टि-प्रतिशतं मतदानम् समभवत्।
- भारतेन संयुक्त-राष्ट्र-सुरक्षा-परिषदः सकाशात् आतङ्कवादे सहायतां कुर्वतः जनान् प्रति असहिष्णुतायाः नीतिम् अवलम्बयेदिति अभ्यर्थितम्।
- **अपि च,**
- दिल्ल्याः वायु-गुणवत्ता 'गम्भीर-श्रेण्याम् समापतिता। केन्द्रसर्वकारेण ग्रैप-तृतीयम् इति प्रवर्तितम्, सहैव पञ्चमी-कक्षा-पर्यन्तं विद्यालयाः ऑनलाइन-रूपेण प्रचलिष्यन्ति।

## • अथ वार्ताः विस्तरेण

### • प्रधानमन्त्री-थिम्पू-सम्बोधनम्:

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् नवदिल्ल्यां सञ्जातायाः भयावह-घटनायाः षड्यन्त्र-कर्तारः नैव क्षमिष्यन्ते। भूटानस्य थिम्पू-नगरे एकं कार्यक्रमं सम्बोधयन्, श्रीमोदी अवदत् यत् सः गतदिने सञ्जातायाः घटनायाः अनुसन्धाने संलग्न-अभिकरणैः सह सम्पर्के अस्ति। सः आश्वासितवान् यत् अन्वेषणबलानि अस्य षड्यन्त्रस्य अवश्यमेव मूलाधारं निग्रहीष्यन्ति।

प्रधानमन्त्री प्रावोचत् यत् अद्यतन-दिवसः भूटानाय हिमालयीय-राष्ट्रस्य राजपरिवाराय तथा विश्व-शान्तौ विश्वासं कुर्वद्भ्यः सर्वेभ्यः जनेभ्यः अति-महत्त्वपूर्णः वर्तते। तेनोदीरितं यत् शताब्दिभ्यः भारत-भूटानयोः मध्ये सम्बन्धाः अतीव-गभीराः, सौहार्दपूर्णाः, तथा सांस्कृतिकाः च आसन्, अतः एतस्मिन् महत्त्वपूर्णावसरे भागग्रहणम् भारतस्य कृते तस्य कृते चापि एका प्रतिबद्धता आसीत्।

### शाह-वाहन विस्फोटः

केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य नवदिल्ल्यां स्वकीयावासे उच्चस्तरीय-सुरक्षासमीक्षोपवेशनस्य आध्यक्षम् अकरोत्। उपवेशनेऽस्मिन् तावत् गतदिने दिल्लीस्थस्य लालकिलायाः समीपे वाहन-विस्फोटेन समुद्भूतायाः स्थितेः आकलनं सञ्जातम्। एतस्मिन् प्रकरणे अष्टजनाः मृत्युमुपगताः सहैव अन्ये केचन व्रणिताः अभवन्। जम्मू-कश्मीरस्य आरक्षक-महानिदेशकः अस्मिन् उपवेशने प्रातिभासिक-माध्यमेन-रूपेण सम्मिलितः। गृह-मन्त्रालयेन घटनायाः अनुसन्धानम् राष्ट्रीय-अनुसन्धानाभिकरणाय प्रदत्तम्।

विस्फोटस्य कारणानि तथा परिस्थितिं अवज्ञातुं जनतायाः सुरक्षां सुनिश्चेतुं च अधिकारिणः कठोर-पर्यवेक्षणं कुर्वन्तः सन्ति।दिल्ली-आरक्षकेण अवैध-गतिविधि-निवारण-अधिनियमान्तर्गतं विस्फोटक-अधिनियमान्तर्गतं, सहैव भारतीय-न्याय-संहितायाः विभिन्न-अनुच्छेदान्तर्गतञ्च प्रकरणमिदं पञ्जीकृतम् ।दिल्ली-मेट्रो-रेल-कॉर्पोरेशनेन इत्यनेन प्रोक्तम् यत् सुरक्षा-कारणात् लालकिला-मेट्रो-स्थानकम् पिहितं भविष्यति ।

**बिहार-विधानसभानिर्वाचनम्**

बिहारराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिम-चरणाय सप्तषष्टि-प्रतिशतं मतदानम् अभवत्। अस्मिन् चरणे विंशतिः जनपदेषु द्वाविंशत्यधिकैकशतं आसनेषु मतदानं अभवत्। सप्तलक्षोत्तर-त्रिकोट्यधिकाः मतदातारः द्व्यधिक-त्रयोदशशतं प्रत्याशिनां निर्वाचनभाग्यं निर्णेष्यन्ति। तेषु षट्त्रिंशत्यधिकैकशतं महिला-प्रत्याशिनः सन्ति। मतदानं प्रातः सप्तवादनात् आरभ्य सायं षड्वादने समाप्तम्। सप्त-आसनेषु सुरक्षाकारणात् सायं पञ्चवादनपर्यन्तं मतदानं समजायत। निर्वाचनायोगेन निर्वाचनस्य विस्तृतप्रबन्धाः कृताः।

**राजनाथ-सुरक्षासंवादः**

दिल्ली-कारविस्फोटस्य उत्तरदायिनः न्यायालयस्य समक्षं स्थापयिष्यन्ते, तेषां कृते दण्डः निश्चप्रचम् भविष्यति इति रक्षामन्त्री राजनाथ सिंहः अद्य देशाय प्रतिज्ञापितवान् । अद्य नवदिल्ल्यां दिल्ली-रक्षण-संवादं सम्बोधयन् श्रीसिंहः सूचितवान् यत् प्रमुखानि अन्वेषण-संस्थानानि घटनायाः विषये द्रुतं सम्यक् च अन्वेषणं कुर्वन्ति इति।

दिल्लीरक्षासंवादविषये वदन् मन्त्री अवदत् यत् एषः संवादः रक्षासुरक्षायाः बहुविधसमस्यानां विषये पूर्णविचारविमर्शस्य रणनीतिकसंलग्नतायाः च प्रमुखमञ्चरूपेण उदभवत्। सः अवदत् यत् संवादोऽयं नूतनदृष्टिं, विश्लेषणात्मिकां अन्तर्दृष्टिं च एकत्र आनयति, येन परिवर्तमाने वैश्विकपरिवेशे समकालीनप्रवृत्तीनां विचाराणां च परीक्षणं कर्तुं शक्यते।

**भारत-संयुक्तराष्ट्रसुरक्षापरिषद्**

भारतेन संयुक्त-राष्ट्र-सुरक्षा-परिषदः आतङ्कवादे उपयुक्तानाम् अवैध-शस्त्राणां सञ्चारस्य वित्तपोषणस्य च सहायतां कुर्वद्भ्यः जनेभ्यः असहिष्णुतायाः नीतिम् अवलम्बयेदिति अभ्यर्थितम्। संयुक्त-राष्ट्रे लघु-शस्त्राणां विषये एकस्मिन् परिचर्चा-सत्रे सम्बोधयन्, भारतस्य स्थायी-प्रतिनिधिः राजदूतः पर्वतनेनी-हरीशः अवदत् यत् देशः दशकेभ्यः अतिसीम्नः आतङ्कवादेन सह सङ्घर्षं कुर्वन् अस्ति इति ।

**दिल्ली-प्रदूषणम्**

दिल्ल्याः समीपवर्ति-क्षेत्रेषु वायु-गुणवत्ता 'गम्भीर-श्रेण्याम् अवलोक्य केन्द्रसर्वकारेण 'स्तरीकृत-प्रतिक्रिया-कार्ययोजना' ग्रैप इत्यस्य तृतीयचरणस्यान्तर्गतं कठोरं प्रदूषण-निवारणात्मकाः कठोर-प्रतिबन्धाः प्रवर्तिताः। वायु-गुणवत्ता-प्रबन्धन-आयोगेन सूचितं यत् दिल्ल्याः वायु-गुणवत्ता-सूचकाङ्कः अद्य द्विषष्ट्यधिक-त्रिंशतं इत्यतः समेध्य चतुर्शतं यावत् वर्धितः, यः 'गम्भीर' वर्गे अन्तर्भवति। परिणामतः पञ्चम-कक्षा-पर्यन्तं विद्यालयानाम् अध्यापनं निरस्तीकृत्य कक्ष्याः ऑनलाइन-रूपेण परिवर्तिताः।

## जम्मूकश्मीर-सुरक्षा

दिल्ल्यां सम्प्रति सञ्जातेन विस्फोट-कारणेन रियासी-जनपद-प्रशासनेश आरक्षकैः सह श्रीमाता-वैष्णोदेवी-तीर्थयात्रायाः आधार-शिविरे कटरायां समीप-प्रदेशेषु च सुरक्षा-संवर्धनं कृतम्। राज्येन हाई-अलर्ट स्थाप्यते, प्रमुखस्थानेषु सुरक्षाकर्मिणां नियोजनं च वर्धितम्।सर्वेषु प्रवेश-निर्गम-बिन्दुषु विशेष-सुरक्षा-केन्द्राणि स्थापितानि, यत्र वाहनानां सूक्ष्म-अन्वेषणं क्रियते। प्रशासनं जनान् तीर्थयात्रिणश्च प्रति सुरक्षा-संस्थाभिः सह सहयोगं कर्तुम्, वैध-परिचय-पत्राणि धारयितुम्, संशयास्पद-गतिविधीनां शीघ्रं निवेदनं दातुं च आग्रहं कृतवत्।

## तमिलनाडु

सम्पूर्णे तमिलनाडु-राज्ये सुरक्षाव्यवस्था दृढीकृता अस्ति। अन्ताराष्ट्रीय-विमानयानयात्रिणः चेन्नई-अन्ताराष्ट्रीय-विमानस्थानकं सार्धत्रयहोराभ्यः पूर्वमेव,राष्ट्रीय-विमानयानयात्रिणः सार्धहोराभ्यः पूर्वमेव आगच्छेयुः इति निर्देशः दत्तः अस्ति।विमानस्थानकं परितः पञ्चस्तरीया सुरक्षाव्यवस्था स्थापिता अस्ति, तथा च सुरक्षा-कर्मचारिभिः वाहनानि अन्वीक्ष्यन्ते। कार्गो-टर्मिनल इत्यत्र, अन्येषु विमानस्थानकेषु, रेलस्थानकेषु, मन्दिरेषु च अतिरिक्त-सुरक्षाव्यवस्था कृता अस्ति। सम्पूर्णे राज्ये वाहन-अन्वीक्षणं तीव्रीकृतम् अस्ति।

**।। इति वार्ताः ।।**